पशुरज्जुः, स्त्री, पशूनामश्वादीनां बन्धनाय रज्जुः। तत्पर्य्यायः। दामनी २। इत्यमरः। २।६।७३॥ बन्धनी ३। इति शब्दरत्नावली॥

पशुराजः, पुं, (पशूनां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति समासान्तटच्।) सिंहः। इति शब्दचन्द्रिका॥

पशुहरीतकी, स्त्री, (पशूनां हरीतकीव हितकारित्वात्।) आम्रातकफलम्। इति त्रिकाण्डशेषः॥

पश्चात्, व्य, (अपरस्मिन् अपरस्मात् अपरो वा वसति आगतो रमणीयं वा। "पश्चात्।" ५।३।३२। इति अपरस्य पश्चभाव आतिच् प्रत्ययोऽस्तातेर्विषये।) प्रतीची। चरमम्। इत्यमरः।३।३।२४२॥ (यथा, रघुः।४।३०।

"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम्।
ययौ पश्चाद्रथादीति चतुस्कन्धेव सा चमूः॥")

अधिकारः। इति मेदिनी। ते, ३१॥

पश्चात्तापः, पुं, (पश्चात् अग्रतोःकार्य्ये कृते चरमे तापः।) अनुशोचनम्। चरमे शोकः। पस्तान इति भाषा। तत्पर्य्यायः। अनुतापः २ विप्रतीसारः ३। इत्यमरः।१।७।२५॥ (यथा, रामायणे।३।५१।३६।

"उक्तेति परुषं वाक्यं पश्चात्तापसमन्वितः॥"

केचित्तु पश्चात् ताप इति पदद्वयमिच्छन्ति॥)

पश्चार्द्धः, त्रि, (अपरश्चासावर्द्धश्च इति। "अपरस्यार्द्धे पश्चभावो वक्तव्यः।" २।१।५८। इत्यस्य वार्त्तिं इति पश्चभावः।) शेषार्द्धः। अपरार्द्धः। यथा, शकुन्तलायाम्। १अङ्के।

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्ब्बकायम्॥"

पश्चिमं, त्रि, (पश्चाद्भवम्। "अग्रादिपश्चात् डिमच्।" ४।३।२३। इत्यस्य वार्त्तिं इति डिमच्।) पश्चाद्भवम्। इत्यमरः।३।१।८१॥ (यथा, रघुः।१७।८।

"तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः।
स्मरन्तः पश्चिमामाज्ञां भर्त्तुः संग्रामयायिनः॥")

पश्चिमा, स्त्री, (पश्चिम+टाप्।) अस्ताचलावच्छिन्नदिक्। तत्पर्य्यायः। प्रतीची २ वारुणी ३ प्रत्यक् ४। तद्दिग्भववायुगुणाः।

"पश्चिमो मारुतस्तीक्ष्णः कफमेदविशोषणः।
सद्यः प्राणहरो दुष्टः शोषकारी शरीरिणाम्॥"
इति राजनिर्घण्टः॥

अपिच। राजवल्लभः।

"पश्चिमोऽग्निवपुर्वर्णबलारोग्यविवर्द्धनः।
कषायः शोषणः स्वर्यो रोचनो विशदो लघुः॥
अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः।
सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत्॥
व्रणसंरोपणस्त्वयो दाहशोथत्वषापहः॥"

तद्दिगधिपतिर्वरुणः। यथा, अमरे। १।३।१।

"इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत्।
कुवेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्॥"

तद्दिक्पतयो मिथुनतुलाकुम्भराशयश्च। यथा,

"प्रागादिककुभान्नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयास्त्रिरावृत्तिपरिभ्रमात्॥"
इति ज्योतिस्तत्त्वम्॥

पश्य, व्य, प्रशंसा। विस्मयः। इति शब्दरत्नावली॥ (पश्यतीति व्युत्पत्त्या "पाघ्राध्माधेट्दृशः शः।" ३।१।१३७। इति शप्रत्ययेन पश्यो वाच्यलिङ्गः। दर्शकः। यथा, मुण्डकोपनिषदि।३।१।३।

"यदा पश्यः पश्यते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥")

पश्यतिकर्म्मा, [न्] पुं, (पश्यतिर्दर्शनमेव कर्म्म यस्य।) दर्शनकर्म्मा। तद्वैदिकपर्य्यायाः। चिक्यत् १ चाकनत् २ आचष्ट ३ चष्टे ४ विचष्टे ५ विचर्षणिः ६ विश्वचर्षणिः ७ अवचाकशत् ८। इत्यष्टौ पश्यतिकर्म्माणः। इति वेदनिघण्टौ ३ अध्यायः॥

पश्यतोहरः, त्रि, (पश्यन्तं जनमनादृत्य हरतीति। हृञ् हरणे+अच्। "षष्ठी चानादरे।" २।३।३८। इति अनादरे षष्ठी। "वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु।" ६।३।२१। इत्यस्य वार्त्तिं इति षष्ठ्या अलुक्।) चौरः। यथा, हेमचन्द्रे। ३।४६।

"यः पश्यतो हरेदर्थं स चौरः पश्यतोहरः॥"

पश्यन् [त्], त्रि, (पश्यतीति। दृशिरौ प्रेक्षणे+"लटः शतृशानचाविति।" ३।२।१२४। इति शतृ।) ईक्षणकर्त्ता। इति व्याकरणम्॥ (यथा, मार्कण्डेये।८९।२६।

"इत्युक्ता सा भगवती चण्डिका चण्डविक्रमा।
पश्यतामेव देवानां तत्रैवान्तरधीयत॥")

पश्यन्ती, स्त्री, (पश्यति या दृश्+शतृ+ङीप्। ततः "शप्श्यनोर्नित्यम्।"७।१।८१। इति नुम्।) मूलाधारोत्थितहृदयगतनादरूपवर्णः। यथा,—

"मूलाधारात् प्रथममुदितो यस्तु तारः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः॥"
इत्यलङ्कारकौस्तुभः॥

(यथाच,—

"वैखरीशक्तिनिष्पत्तिर्मध्यमा श्रुतिगोचरा।
द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी॥"
इति मल्लिनाथधृतवाक्यम्॥

ईक्षणकर्त्री। इति व्याकरणम्॥)

पश्वाचारः, पुं, (पशूनां तन्त्रोक्ताधिकारिविशेषाणामाचारः।) आचारविशेषः। यथा,—

"वेदोक्तेन यजेद्देवीं कामसङ्कल्पपूर्ब्बकम्।
स एव वैदिकाचारः पश्वाचारः स उच्यते॥"
इत्याचारभेदतन्त्रम्॥

पष, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पाषयति। तालव्यान्त एवायमिति बहवः। दन्त्यान्त इति केचित्। मूर्द्धन्यान्तपाठस्तु कस्यचिदनुरोधात्। इति दुर्गादासः॥

पष, ञ बाधे। ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) ञ, पषति पषते। बाधो विहतिः। ग्रन्थो ग्रन्थनम्। ग्रन्थनस्थाने स्पर्शनं केचित् पठन्ति। इति दुर्गादासः॥

पष, त् क अनुपसर्गादन्धबाधयोः। स्पर्शगत्योः। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) मूर्द्धन्योपधः। क, पषयति। अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते। बाधो विहतिः। इति दुर्गादासः॥

पस, इ क नाशे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) नाश इह नष्टीकरणम्। इ क, पंसयति पापं गङ्गा। इति दुर्गादासः॥

पस, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पासयति। पृथक्पाठादयं न णित्। अन्यथा पस कि ञ इत्यनेनैवेष्टसिद्धे पृथक्पाठोऽनर्थकः स्यात्। इति दुर्गादासः॥

पस, ञ बाधे। ग्रन्थे। इति कविकल्पद्रुमः। (भ्वां-उभं-सकं-सेट्।) ञ, पसति पसते। इति दुर्गादासः॥

पस्त्यं, क्ली, (अपस्त्यायन्ति सङ्घीभूय तिष्ठन्ति जीवा यत्र। अप+स्त्यै सङ्घातशब्दयोः+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। उपसर्गस्याकारलोपो निपातनात्।) गृहम्। इति हेमचन्द्रः।४।५६॥ (यथा, ऋग्वेदे। १०।९६।११। [सूर्याय॥")
प्र पस्त्यमसुर हर्य्यतं गोराविष्कृधि हरये

पह्नवः, पुं, श्मश्रुधारिम्लेच्छजातिविशेषः। तस्य विवरणं यथा, हरिवंशे। १४। १५—१९।

"सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च॥
पारदा मुक्तकेशाश्च पह्नवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्नवास्तथा।
कोलाः सर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥
सर्व्वे ते क्षत्त्रियास्तात! धर्म्मस्तेषां निराकृतः।
वशिष्ठवचनाद्राजन्! सगरेण महात्मना॥"

(क्वचित् पह्नवः पाठोऽपि दृश्यते। यथा, गौः रामायणे।१।५५।१८।

"तस्या हुम्भारवोत्सृष्टाः पह्नवाः शतशो नृप!।
नाशयन् बलं सर्व्वं विश्वामित्रस्य पश्यतः॥")

पह्लिका, स्त्री, वारिपर्णी। इति शब्दमाला॥

पा, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अस्यैव पिबादेशः। पिबति पयः पान्थः। इति दुर्गादासः॥

पा, ल रक्षणे। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्।) ल, पाति। इति दुर्गादासः॥